# Pravachanapurva Stutih

# પ્રવચનપૂર્વસ્તુતિઃ

## Document Information

Text title : Pravachanapurva Stutih

File name : pravachanapUrvastutiH.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Proofread by : Mohan Chettoor

Latest update : January 13, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2023

*sanskritdocuments.org*

# પ્રવચનપૂર્વસ્તુતિઃ

(શ્રી નિરઞ્જનપીઠાધીશ્વર આચાર્ય મહામણ્ડલેશ્વર
યતીન્દ્ર સ્વામી શ્રીકૃષ્ણાનન્દ ગિરિજી મહારાજ
કે પ્રવચન કે પૂર્વ કી સ્તુતિ)
સર્વવેદાન્તસિદ્ધાન્તગોચરં તમગોચરમ્ ।
મહેશં સચ્ચિદાનન્દં સદ્ગુરું પ્રણતોઽસ્મ્યહમ્ ॥

યા કુન્દેન્દુતુષારહારધવલા યા શુભ્રવસ્ત્રાવૃતા
યા વીણાવરદણ્ડમણ્ડિતકરા યા શ્વેતપદ્માસના ।
યા બ્રહ્માચ્યુતશઙ્કરપ્રભૃતિભિર્દેવૈઃ સદા વન્દિતા
સા માં પાતુ સરસ્વતી ભગવતી નિઃશેષજાડ્યાપહા ॥ ૧॥

શુક્લાં બ્રહ્મવિચારસારપરમામાદ્યાં જગદ્વ્યાપિનીં
વીણાપુસ્તકધારિણીમભયદાં જાડ્યાન્ધકારાપહામ્ ।
હસ્તે સ્ફાટિકમાલિકાં વિદધતીં પદ્માસને સંસ્થિતાં
વન્દે તાં પરમેશ્વરી ભગવતીં બુદ્ધિપ્રદાં શારદામ્ ॥ ૨॥

મન્દારમાલાકલિતાલકાયૈ કપાલમાલાઙ્કિતશેખરાય ।
દિવ્યામ્બરાયૈ ચ દિગમ્બરાય નમઃ શિવાય ચ નમઃ શિવાય ॥ ૩॥

મુખે તે તામ્બૂલં નયનયુગલે કજ્જલકલા
લલાટે કાશ્મીરં વિલસતિ ગલે મૌક્તિકલતા ।
સ્ફુરત્ કાઞ્ચીસાટી પૃથુકટિતટે હાટકમયી
ભજામિ ત્વાં ગૌરી નગપતિકિશોરીમભિરતમ્ ॥ ૪॥

હંસો પદ્મવનં સમિચ્છતિ યથા નીલામ્બુદં ચાતકઃ
કોકઃ કોકનદપ્રિયં પ્રતિદિનં ચન્દ્રં ચકોરસ્તથા ।
ચેતો વાઞ્છતિ મામકં પશુપતે ચિન્માર્ગભૃગ્યં વિભો
ગૌરીનાથ ભવત્પદાબ્જયુગલં કૈવલ્યસૌખ્યપ્રદમ્ ॥ ૫॥

અયઃ સ્પર્શે લગ્નં સપદિ લભતે હેમપદવીં
    યથા રથ્યાપાથઃ શુચિ ભવતિ ગઙ્ગૌઘમિલિતમ્ ।
તથા તત્તત્પાપૈરતિમલિનમન્તર્મમ યદિ
    ત્વયિ પ્રેમ્ણા સક્તં કથમિવ ન જાયેત વિમલમ્ ॥ ૬॥

આકાશેન શિખી સમસ્ત ફણિનાં નેત્રા કલાપી નતાન્
    ઉદ્ગ્રાહી પ્રણવોપદેશનિનદૈઃ કેકીતિ યો ગીયતે ।
શ્યામાં શૈલસમુદ્ભવાં ઘનરુચિં દૃષ્ટ્વા નટન્તં મુદા
    વેદાન્તોપવને વિહારરસિકં તં નીલકણ્ઠં ભજે ॥ ૭॥

મહાન્તં વિશ્વાસં તવ ચરણપઙ્કેરુહયુગે
    નિધાયાન્યં નૈવાશ્રિતમિહ મયા દૈવતમુમે ।
તથાઽપિત્વચ્ચેતો મયિ ન યદિ જાયેત કરુણં
    નિરાલમ્બો લમ્બોદરજનનિ કં યામિ શરણમ્ ॥ ૮॥

ઇતિ શ્રી નિરઞ્જનપીઠાધીશ્વર આચાર્ય મહામણ્ડલેશ્વર યતીન્દ્ર
સ્વામી શ્રીકૃષ્ણાનન્દ ગિરિજી મહારાજસ્ય પ્રવચનપૂર્વસ્તુતિઃ સમાપ્તા ।

Proofread by Mohan Chettoor

*Pravachanapurva Stutih*

pdf was typeset on January 14, 2023

Please send corrections to *sanskrit@cheerful.com*